# एककम् - ५



# संस्कृतिः ।

अतिथिपूजा त्यागादयश्च भारतसंस्कृतेः महिताः गुणाः भवन्ति। स्वार्थविमुखाः परहितनिरताश्चासन् भारतीयाः राजानः। तादृशस्यैकस्य राज्ञः त्यागशीलतायाः कथा, महाकवेः कालिदासस्य कुमारसम्भवाद् उद्धृताः पञ्चश्लोकाः, भासमहाकवेः दूतवाक्यं नाम नाटकात् सङ्कलितः भागः, प्रहेलिकाश्च अत्र आयोजिताः।



# १. रन्तिदेवस्य कीर्तिः ।

भारतवंशे रन्तिदेवः इति धीरः कश्चन राजा आसीत्। कालेन सः दानकर्मणा दरिद्रः अभवत्। अतीव क्षुत्तृडार्तोऽपि सः धीरतां न तत्याज। जलेनापि विना कानिचिद्दिनानि व्यतीतानि।

तस्मिन्नवसरे कुतश्चित् किञ्चित् घृतं, किञ्चित् पायसं, जलं च तेन लब्धम्। क्षीणः वेपथुगात्रः सः भोजनं कर्तुम् उद्युक्तवान्। सकुटुम्बं भोजनार्थम् उपाविशत्। यदा सः भोक्तुमारभत तदा कश्चन ब्राह्मणातिथिः आगच्छत्। राजा तम् अवदत् - "स्वागतं भोः! आगच्छतु। को विशेषः ? कुतः आयाति ?"

ब्राह्मणः - नमस्ते। अहम् अनेन मार्गेण गच्छन् अस्मि। मम बुभुक्षा वर्धते। तच्छमनाय भोजनं दीयताम्।

राजा - आम्, उपविशतु दास्यामि।

अतिथिपूजातत्परः दयालुः स राजा स्वकुटुम्बाय निश्चितम् भक्षणं विभज्य एकं भागं तस्मै सादरम् अदात्। भोजनानन्तरं राजानमनुगृह्य ब्राह्मणः ततः निर्जगाम।

ततः राजा भोजनार्थमुपविवेश। तदा एकः शूद्रातिथिः आगच्छत्। तमपि सामोदं स्वीचकार। स्वपरिवाराय कल्पितात् भोज्याद् एकं भागं तस्मै

ददौ च। शूद्रः भोजनं कृत्वा निर्गतः। अथ यदा राजा भोक्तुमारभत तदा अपरः अतिथिः शुनकैः साकम् उपागच्छत्। आतिथेयः राजा तमपि सबहुमानं स्वीकृतवान्।

राजा - अयि भो! आगच्छतु। भवान् कुतः आगच्छति? किमावश्यकम्?

अतिथिः - अहं अनेन मार्गेण गच्छन्नस्मि। एते शुनकाः अहं च क्षुधया पीडिताः। यत्किञ्चिद्दीयताम्।



अतिथेः वाचः श्रुत्वा राजा ब्राह्मणादीनां भोजनानन्तरं स्वपरिवाराय कल्पितं भोज्यं शुनकेभ्यः तत्स्वामिने च प्रददौ। एवं भोज्यं सर्वं समाप्तम्। ततः सः यदा जलं पातुमारभत तदा 'मह्यं जलं देहि' इति दीनदीनं विलपन् कश्चन तत्राजगाम। आर्द्रहृदयः राजा तमपि ससन्तोषं स्वीकृत्य - 'जीवजलं



समर्पयामि' इति अमृतकल्पं वचः उक्त्वा तस्मै जलं प्रादात्। एवं स्वयं क्षुधार्तोऽपि सर्वेषां भोज्यवस्तूनां दानेन रन्तिदेवः 'त्यागमूर्तिः' इति उन्नतपदवीम् आरूढवान् प्रथितश्चाभवत्। सः एवं प्रार्थयामास -

न कामये गतिमीश्वरात्परा-
मष्टर्धियुक्तामपुनर्भवं वा।
आर्तिं प्रपद्येऽखिलदेहभाजा-
मन्तस्थितो येन भवन्त्यदुःखाः।।

**पदच्छेदः।**

| | | |
|---|---|---|
| कानिचिद्दिनानि | - | कानिचित् + दिनानि |
| चाकरोत् | - | च + अकरोत् |
| तच्छमनाय | - | तत् + शमनाय |
| तत्राजगाम | - | तत्र + आजगाम |
| तस्मिन्नवसरे | - | तस्मिन् + अवसरे |
| प्रथितश्चाभवत् | - | प्रथितः + च + अभवत् |
| भवन्त्यदुःखाः | - | भवन्ति + अदुःखाः |
| भोक्तुमारभत | - | भोक्तुम् + आरभत |
| भोजनार्थमुपविवेश | - | भोजनार्थम् + उपविवेश |

**व्याकरणविशेषः।**

मह्यं देहि - दानार्थकधातुयोगे चतुर्थी।

यथा - प्रभुः भृत्याय वेतनं ददाति।

**विग्रहाः।**

| | | |
|---|---|---|
| क्षुत्तृडार्तः | - | क्षुत् च तृड् च क्षुत्तृषौ। ताभ्यामार्तः। |
| ब्राह्मणातिथिः | - | ब्राह्मणश्चासौ अतिथिश्च। |
| शूद्रातिथिः | - | शूद्रश्चासौ अतिथिश्च। |



| | | |
|---|---|---|
| पूजातत्परः | - | पूजायां तत्परः। |
| क्षुधार्तः | - | क्षुधया आर्तः। |
| भोज्यं | - | भोक्तुं योग्यम्। |

## किं करणीयम् ?

❖ कथां पठित्वा दाञ् धातोः प्रयोगसहितानि वाक्यानि चित्वा लिखतु। तानि परीक्ष्य साजात्यानि विवेचयतु।

उदा - भोज्यं विभज्य एकं भागं तस्मै सादरमदात्।

❖ कथां पठित्वा भारतीयसंस्कृतेः विशेषानधिकृत्य चर्चां करोतु। टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- आशयव्यक्तता।

❖ संस्कृतिप्रतिपादिकाः कथाः समाहरतु। तासां सम्पुटं च करोतु।

**श्रद्धेयाः अंशाः।**

- विषयसंबन्धः।
- उचितरीत्या क्रमीकरणम्।

❖ राज्ञः शूद्रस्य च संभाषणं संभाव्य लिखतु।

**श्रद्धेयाः अंशाः।**

- उचितभाषाप्रयोगः।
- आशयव्यक्तता।

# १०. पृथिव्याः मानदण्डः ।

महाकवेः कालिदासस्य प्रकृतिवर्णनानैपुणी कुमारसम्भवे लसतितराम्। तत्र प्रथमसर्गे कविः हिमालयं वर्णयति। ततः केचित् श्लोकाः अत्र उद्धृताः।





**अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ वारिनिधी वगाह्य**
**स्थितः पृथिव्या इव मानदण्डः।।१।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| अस्त्युत्तरस्यां | - | अस्ति + उत्तरस्याम् |
| हिमालयो नाम | - | हिमालयः + नाम |
| पृथिव्या इव | - | पृथिव्याः + इव |

**अन्वयः** उत्तरस्यां दिशि हिमालयो नाम देवतात्मा नगाधिराजः पूर्वापरौ वारिनिधी वगाह्य पृथिव्याः मानदण्डः इव स्थितः अस्ति।

**पदार्थाः।**

| | | |
|---|---|---|
| उत्तरस्यां दिशि | - | उत्तरदिशायाम् |
| हिमालयो नाम | - | हिमालय इति प्रसिद्धः |
| देवतात्मा | - | देवताशरीरः |
| नगाधिराजः | - | पर्वतराजः |
| पूर्वापरौ | - | पूर्वपश्चिमौ |
| वारिनिधी | - | समुद्रौ |
| वगाह्य | - | प्रविश्य |
| पृथिव्याः | - | भूमेः |
| मानदण्डः इव | - | मापकः इव |
| स्थितः अस्ति | - | वर्तते। |

**आशयः** भारतस्य उत्तरस्यां दिशि हिमालयो नाम देवताशरीरः पर्वतश्रेष्ठः पूर्वपश्चिमौ समुद्रौ प्रविश्य भूमेः मानदण्डः इव स्थितः अस्ति।



**अनन्तरत्नप्रभवस्य यस्य**
**हिमं न सौभाग्यविलोपि जातम्।**
**एको हि दोषो गुणसन्निपाते**
**निमज्जतीन्दोः किरणेष्विवाङ्कः।।२।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| एको हि | - | एकः + हि |
| दोषो गुणसन्निपाते | - | दोषः + गुणसन्निपाते |
| निमज्जतीन्दोः | - | निमज्जति + इन्दोः |
| किरणेष्विवाङ्कः | - | किरणेषु + इव + अङ्कः |

**अन्वयः** यस्य अनन्तरत्नप्रभवस्य हिमं सौभाग्यविलोपि न जातम्। (सः हिमालयो नाम नगाधिराजः अस्ति।) हि एकः दोषः गुणसन्निपाते इन्दोः अङ्कः किरणेषु इव निमज्जति।

**पदार्थाः।**

| | | |
|---|---|---|
| यस्य अनन्तरत्नप्रभवस्य | - | नानाविधानां रत्नानां उद्भवस्थानभूतस्य हिमालयस्य |
| हिमम् | - | तुषारः |
| सौभाग्यविलोपि | - | सौभाग्यनाशकारि |
| न जातं | - | न अभवत् |
| हि | - | यतः |
| एकः दोषः | - | एकः दोषः |
| गुणसन्निपाते | - | गुणानां समूहे |
| इन्दोः | - | चन्द्रस्य |
| किरणेषु इव | - | रश्मिषु इव |
| अङ्कः | - | कलङ्कः |
| निमज्जति | - | अवगाहते। |

**आशयः** अनन्तानां रत्नानाम् उद्भवस्थानभूतस्य अनेकगुणयुक्तस्य अस्य हिमालयस्य हिमं सौभाग्यनाशकं नाभवत्। यतः दोषलेशः गुणसन्निपाते किरणेषु इन्दोः अङ्कः इव अदृश्यः भवति।

**कपोलकण्डूः करिभिर्विनेतुं**
**विघट्टितानां सरलद्रुमाणाम्।**
**यत्र स्नुतक्षीरतया प्रसूतः**
**सानूनि गन्धः सुरभीकरोति।।३।।**



**पदच्छेदः।**

करिभिर्विनेतुं - करिभिः + विनेतुं

**अन्वयः** यत्र करिभिः कपोलकण्डूः विनेतुं विघट्टितानां सरलद्रुमाणां स्नुतक्षीरतया प्रसूतः गन्धः सानूनि सुरभीकरोति (सः हिमालयः)।



**पदार्थाः।**

| | | |
|---|---|---|
| यत्र | - | यस्मिन् हिमालये |
| करिभिः | - | गजैः |
| कपोलकण्डूः | - | कपोलखर्जनं |
| विनेतुं | - | अपाकर्तुं |
| विघट्टितानां | - | घर्षणं प्राप्तानां |
| सरलद्रुमाणां | - | सालवृक्षाणां |
| स्रुतक्षीरतया | - | निर्गतस्रवत्वात् |
| प्रसूतः | - | जातः |
| गन्धः | - | सुगन्धः |
| सानूनि | - | पर्वताधःप्रदेशान् |
| सुरभीकरोति | - | सुगन्धयुक्तान् करोति। |

**आशयः** वन्यगजाः कपोलकण्डूनां दूरीकरणाय सालवृक्षेषु कपोलस्य घर्षणं कुर्वन्ति। अतः सालवृक्षेभ्यः निर्गताः रसाः वायौ वाति सति हिमालयस्याधःप्रदेशान् सुरभिलान् करोति।

**विग्रहाः** सुरभीकरोति - असुरभीणि सुरभीणि सम्पद्यमानानि करोति।

**पदं तुषारस्रुतिधौतरक्तं**
**यस्मिन्नदृष्ट्वापि हतद्विपानाम्।**
**विदन्ति मार्गं नखरन्ध्रमुक्तै-**
**र्मुक्ताफलैः केसरिणां किराताः।।४।।**



**पदच्छेदः।**

| | | |
|---|---|---|
| यस्मिन्नदृष्ट्वापि | - | यस्मिन् + अदृष्ट्वा + अपि |
| नखरन्ध्रमुक्तैर्मुक्ताफलैः | - | नखरन्ध्रमुक्तैः + मुक्ताफलैः |

**अन्वयः** यस्मिन् हतद्विपानां तुषारस्रुतिधौतरक्तं पदम् अदृष्ट्वापि नखरन्ध्रमुक्तैः मुक्ताफलैः किराताः केसरिणां मार्गं विदन्ति (सः हिमालयः अस्ति)।

**पदार्थाः।**

| | | |
|---|---|---|
| यस्मिन् | - | यस्मिन् हिमालये |
| किराताः | - | निषादाः |
| तुषारस्रुतिधौतरक्तं | - | हिमस्रवेण क्षालितरक्तं |
| हतद्विपानां | - | मारितगजानां |
| पदं | - | पादन्यासं |
| अदृष्ट्वापि | - | न दृष्ट्वा अपि |
| नखरन्ध्रमुक्तैः | - | नखानां रन्ध्रेभ्यः छिद्रेभ्यः मुक्तैः गलितैः |
| मुक्ताफलैः | - | गजमौक्तिकैः |
| केसरिणाम् | - | सिंहानां |
| मार्गं विदन्ति। | - | मार्गं जानन्ति। |

**आशयः** हिमालये गजान् हत्वा गतानां सिंहानां हिमप्रवाहक्षालितं पादन्यासम् अदृष्ट्वापि, तेषां नखान्तरालेभ्यः पतितैः गजमौक्तिकैः निषादाः तेषां मार्गं जानन्ति। तादृशः हिमालयः।

**आमेखलं सञ्चरतां घनानाम्**
**छायामधः सानुगतां निषेव्य।**
**उद्वेजिता वृष्टिभिराश्रयन्ते**
**शृङ्गाणि यस्यातपवन्ति सिद्धाः।।५।।**



**पदच्छेदः।**

| | | |
|---|---|---|
| छायामधः | - | छायाम् + अधः |
| वृष्टिभिराश्रयन्ते | - | वृष्टिभिः + आश्रयन्ते |
| यस्यातपवन्ति | - | यस्य + आतपवन्ति |

**अन्वयः** सिद्धाः आमेखलं सञ्चरतां घनानाम् सानुगतां छायाम् अधः निषेव्य वृष्टिभिः उद्वेजिताः यस्य आतपवन्ति शृङ्गाणि आश्रयन्ते। (सः हिमालयः।)

**पदार्थाः।**

| | | |
|---|---|---|
| सिद्धाः | - | देवयोनिविशेषाः |
| यस्य | - | हिमालयस्य |
| आमेखलं | - | सानुपर्यन्तं |
| घनानाम् | - | मेघानाम् |
| सानुगतां | - | सानुनि स्थितां |
| छायाम् | - | अनातपं |
| अधः | - | अधित्यकायां |
| निषेव्य | - | संसेव्य |
| वृष्टिभिः | - | वर्षैः |
| उद्वेजिताः | - | पीडिताः |
| आतपवन्ति | - | सूर्यातपयुक्तानि |
| शृङ्गाणि | - | शिखराणि |
| आश्रयन्ते | - | अवलम्बन्ते। |

**आशयः** सिद्धाः मेखलापर्यन्तं सञ्चरतां घनानाम् सानुव्याप्तासु छायासु विश्रान्तिं लभन्ते। तदा वृष्टौ पतन्त्यामपि ते न क्लिश्यन्ति। यतो हि आतपवन्ति मेघमण्डलस्य उपरिस्थितानि शृङ्गाणि ते आश्रयन्ते। (हिमालयस्य शृङ्गाणि मेघमार्गम् अतिलङ्घ्य वर्तन्ते इति भावः।)



## विग्रहवाक्यानि।

अनन्तरत्नप्रभवस्य - प्रभवति अस्मादिति प्रभवः। अनन्तानां रत्नानां प्रभवः, तस्य।

आमेखलम् - आ मेखलायाः।

गुणसन्निपाते - गुणानां सन्निपातः, तस्मिन्।

तुषारस्रुतिधौतरक्तम् - तुषारस्य स्रुतिः, तया धौतं रक्तं यस्य तत्।

वारिनिधी - वारीणां निधिः, तौ।

देवतात्मा - देवता आत्मा यस्य सः।

नखरन्ध्रमुक्तैः - नखानां रन्ध्राणि तेभ्यः मुक्तानि, तैः।

नगाधिराजः - न गच्छति इति नगः। अधिको राजा अधिराजः। नगानामधिराजः नगाधिराजः।

मानदण्डः - मानार्थः दण्डः।

सानुगतां - सानु गता, तां।

सौभाग्यविलोपि - विलोपयितुं शीलम् अस्यास्तीति विलोपि। सौभाग्यस्य विलोपि।

हतद्विपानाम् - हताः द्विपाः यैः तेषाम्।

हिमालयः - हिमानाम् आलयः।

## व्याकरणविशेषः।

अवगाह्य इत्यत्र अव इत्युपसर्गे अकारस्य लोपे वगाह्य इति रूपम्।



## किं करणीयम् ?

❖ पाठभागस्थान् श्लोकान् सतालम् आलपतु।

**श्रद्धेयाः अंशाः।**

- अक्षरस्फुटता।
- आशयावगाहः।
- तालबोधः।

❖ पाठभागं पठित्वा कवेः प्रकृतिवर्णनापाटवमधिकृत्य चर्चां करोतु। टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः।**

**चर्चायां**

- विषयावबोधः।
- स्वावसरप्रतिपालनम्।

**लेखने**

- उचितभाषाप्रयोगः।
- विषयावबोधः।
- क्रोडीकरणम्।



# ११. कौरवसभायां पाण्डवदूतः।

प्रथितयशाः महाकविः भासः बहूनि नाटकानि व्यरचयत्। तानि नाटकानि भासनाटकचक्रम् इति प्रथया व्यवह्रियन्ते। तस्मिन् चक्रे अन्यतमं भवति दूतवाक्यम्। पाण्डवानां राज्यार्धलाभाय सन्देशमादाय प्रस्थितः दूतः कृष्णः कौरवसभायां दुर्योधनमुपगच्छति।

वासुदेवः - (*प्रविश्य*) कथं कथं मां दृष्ट्वा संभ्रान्ताः सर्वक्षत्रियाः। अलमलं संभ्रमेण। स्वैरमासतां भवन्तः।

दुर्योधनः - कथं कथं केशवं दृष्ट्वा संभ्रान्ताः सर्वक्षत्रियाः। अलमलं संभ्रमेण।

(*आसनात् पतित्वा*) सुव्यक्तं प्राप्त एव केशवः। अहो! बहुमायोऽयं दूतः। भो दूत! एतदासनम् आस्यताम्।





वासुदेवः - सर्वेऽप्यासताम्। वयमप्युपविशामः।

(*दृष्ट्वा*) अहो! दर्शनीयोऽयं चित्रपटः। (*निरीक्ष्य*) मा तावत्। हे सुयोधन! अपनीयतामेष चित्रपटः।

दुर्योधनः - बादरायण! अपनीयतां किल चित्रपटः।

काञ्चुकीयः - यदाज्ञापयति महाराजः। (*अपनयति*)

दुर्योधनः - भो दूत!

धर्मात्मजो वायुसुतश्च भीमो
भ्रातार्जुनो मे त्रिदशेन्द्रसूनुः।
यमौ च तावश्विसुतौ विनीतौ
सर्वे सभृत्याः कुशलोपपन्नाः?।।



वासुदेवः - सदृशमेतद् गान्धारीपुत्रस्य। कुशलिनः ते भवतः कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति -

अनुभूतं महद्दुःखं सम्पूर्णः समयः स च।
अस्माकमपि धर्म्यं यद्दायाद्यं तद्विभज्यताम् ।। इति।

दुर्योधनः - कथं कथं दायाद्यमिति। दारनिस्पृहः पितृव्यः परात्मजानां पितृतां कथं व्रजेत्?

वासुदेवः - पुराविदं भवन्तं पृच्छामि। अम्बिकायां व्यासेन जातः धृतराष्ट्रः कथं विचित्रवीर्यस्य राज्यं लभेत? बहु मा वद। युधिष्ठिरमुखाः यद् प्रणयाद् ब्रुवन्ति तत् त्वं कर्तुमर्हसि।

दुर्योधनः - भो दूत! न जानाति भवान् राज्यव्यवहारम्। राज्यं न दानार्थम्। यदि ते नृपतित्वमिच्छन्ति तर्हि साहसं कुर्वन्तु।

वासुदेवः - भो सुयोधन! अलं बन्धुजने परुषमभिधातुम्।

कर्तव्यो भ्रातृषु स्नेहो
विस्मर्तव्या गुणेतराः।
संबन्धो बन्धुभिः श्रेयान्
लोकयोरुभयोरपि।।

दुर्योधनः - हा! हा! हा! देवात्मजैः सह मनुष्याणां बन्धुता ?

वासुदेवः - दातुमर्हसि मद्वाक्याद्
राज्यार्धं धृतराष्ट्रज।
अन्यथा सागरान्तां गां
हरिष्यन्ति हि पाण्डवाः।।

दुर्योधनः - कथं कथं? हरिष्यन्ति हि पाण्डवाः। पितृभुक्ते वीर्यगुप्ते स्वराज्ये त्वद्वचोभिः तृणमपि न दास्ये।

वासुदेवः - भो कुरुकुलकलङ्कभूत! अयशोलुब्ध! वयं किल तृणान्तराभिभाषकाः।

दुर्योधनः - भो गोपालक! तृणान्तराभिभाष्यो भवान्।

वासुदेवः - भो सुयोधन! ननु क्षिपसि माम्?

दुर्योधनः - आः। अभाष्यस्त्वम्।





वासुदेवः - न व्याहरति मां किल सुयोधनः। भोः,

शठ! बान्धवनिःस्नेह!
काक! केकर! पिङ्गल!
त्वदर्थात् कुरुवंशोऽय-
मचिरान्नाशमेष्यति।।

भो भो राजानः। गच्छामस्तावत्।

दुर्योधनः - कथं यास्यति किल केशवः। दुःशासन! दुर्मर्षण! दुर्मुख! दुर्बुद्धे! दुष्टेश्वर! दूतसमुदाचारमतिक्रान्तः केशवो बध्यताम्। कथमशक्ताः? भवतु। अहमेव पाशैर्बध्नामि।



**पदच्छेदः।**

| | | |
|---|---|---|
| अचिरान्नाशमेष्यति | - | अचिरात् + नाशम् + एष्यति |
| अपनीयतामेष | - | अपनीयताम् + एष |
| अलमलम् | - | अलम् + अलम् |
| कुरुवंशोऽयं | - | कुरुवंशः + अयं |
| गच्छामस्तावत् | - | गच्छामः + तावत् |
| दर्शनीयोऽयं | - | दर्शनीयः + अयं |
| दुर्योधनमुपगच्छति | - | दुर्योधनम् + उपगच्छति |
| नृपतित्वमिच्छन्ति | - | नृपतित्वम् + इच्छन्ति |
| पाशैर्बध्नामि | - | पाशैः + बध्नामि |
| बहुमायोऽयं | - | बहुमायः + अयं |
| यदाज्ञापयति | - | यत् + आज्ञापयति |
| लोकयोरुभयोरपि | - | लोकयोः + उभयोःअपि |
| वयमप्युपविशामः | - | वयम् + अपि + उपविशामः |
| वायुसुतश्च | - | वायुसुतः + च |
| सन्देशमादाय | - | सन्देशम् + आदाय। |

**विग्रहाः।**

| | | |
|---|---|---|
| अचिरात् | - | न चिरात्। |
| कुरुवंशः | - | कुरूणां वंशः। |
| गुणेतराः | - | गुणेभ्यः इतरे। |
| तृणान्तराभिभाषकाः | - | तृणमन्तरा कृत्वा अभिभाषन्ते इति। |
| दायाद्यं | - | दायम् आददाति इति दायादः, तस्य योग्यम्। |
| दारनिस्पृहः | - | निर्गता स्पृहा यस्मात्, सः निस्पृहः। दारेषु निस्पृहः। |
| परात्मजानां | - | परेषाम् आत्मजाः, तेषाम्। |
| पितृता | - | पितुः भावः। |
| पितृव्यः | - | पितुः भ्राता। |
| बहुमायाः | - | बहवः मायाः यस्य, सः। |



| | | |
|---|---|---|
| वीर्यगुप्ते | - | वीर्येण गुप्तं तस्मिन्। |
| सागरान्तां | - | सागरः अन्तः यस्याः, ताम्। |

**व्याकरणविशेषः।**

अलं संभ्रमेण - प्रतिषेधार्थे अलं शब्दयोगे तृतीया।

**किं करणीयम्?**

❖ नाटकांशे प्रदत्तानि संबोधनरूपाणि व्याक्षेपकाणि च चित्वा लिखतु।

| उदा - संबोधनम् | व्याक्षेपकम् |
|---|---|
| दूत ! | अहो ! |

❖ दातुमर्हसि मद्वाक्याद्
राज्यार्धं धृतराष्ट्रज।
अन्यथा सागरान्तां गां
हरिष्यन्ति हि पाण्डवाः।। श्लोकस्यास्य आशयमाधारीकृत्य कृष्णदुर्योधनयोः मिथः भाषणं संभाव्य लिखतु।

दुर्योधनः – भो दूत! किं जल्पसे?

कृष्णः – धृतराष्ट्रज ! रज्यार्धं तेभ्यः दीयताम्।

दुर्योधनः – ..........................................

कृष्णः – ............................................

दुर्योधनः – ........................................

कृष्णः – ........................................

❖ नाटकमिदं वर्गे अवतारयतु।

**श्रद्धेयाः अंशाः।**

- भावाविष्कारः।
- उच्चारणस्फुटता।

❖ केशवं बन्धुमुद्युक्तस्य दुर्योधनस्य अनुभवविशेषान् संभाव्य लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- उचितभाषाप्रयोगः।



# १२. वृथा बुधाः भ्रमन्ति ।

साहित्यविनोदेषु समस्यापूरणप्रेहिलिकादीनि अन्तर्भवन्ति। मनोविनोदाय चिन्ताशक्तिपोषणाय च एतानि अत्यन्तमुपकुर्वन्ति। पूर्वं विद्वद्गोष्ठीषु एतानि प्रचलितानि आसन्।

**शस्त्रं न खलु कर्तव्य-**
**मिति पित्रा समीरितः।**
**तदेव शस्त्रं कृतवान्**
**पितुराज्ञा न लङ्घिता।।१।।**

**समस्या** : पित्रा शस्त्रं न खलु कर्तव्यमिति समीरितः। तदेव शस्त्रं कृतवान्। पितुः आज्ञा न लङ्घिता। कथम्?

**समाधानम्** : नखलु (नखं लुनाति इति - नखलु) शस्त्रं कर्तव्यमिति पित्रा उक्तः। पुत्रस्तु तदेव शस्त्रं (नखलु) कृतवान्। पुत्रेण पितुः आज्ञा न लङ्घिता।

**स्नातुं गता नदीतीरं**
**एको ना विंशतिस्त्रियः।**
**नक्रो जग्राह तास्वेकां**
**विंशतिः पुनरागता।।२।।**

**समस्या** : एको ना विंशतिःस्त्रियः (नवदश - 19) स्नातुं नदीतीरं गताः। तासु एकां नक्रः जग्राह। पुनः विंशतिः (20) आगताः। कथम्?

**समाधानम्** : एकः ना (पुरुषः) विंशतिः स्त्रियः च स्नातुं नदीतीरं गताः। तासु स्त्रीषु एकां नक्रः जग्राह। विंशतिः (एकः पुरुषः ऊनविंशतिः स्त्रियः च) पुनः आगताः।



**पदच्छेदः** एकोना - एकः + ना

**विग्रहः** एकोना - एकेन ऊना।

**कुमारसम्भवं दृष्ट्वा**
**रघुवंशे मनोहरे।**
**राक्षसानां कुलश्रेष्ठो**
**रामो राजीवलोचनः।।३।।**

**समस्या** : अस्य श्लोकस्यान्वयः कथं भवति?

**समाधानम्** : राक्षसानां संभवं दृष्ट्वा मनोहरे रघुवंशे कुलश्रेष्ठः राजीवलोचनः रामः कुम् (भूमिं) आर (प्राप)। (कुम् + आर + सम्भवम् - कुमारसम्भवम्)।

**अम्लानपङ्कजा माला**
**कण्ठे रामस्य सीतया।**
**वृथा बुधा भ्रमन्त्यत्र**
**प्रत्यक्षेपि क्रियापदे।।४।।**

**समस्या** : सीतया रामस्य कण्ठे अम्लानपङ्कजा माला...... अत्र क्रियापदं किम्? अत्र क्रियापदे प्रत्यक्षे अपि बुधाः वृथा भ्रमन्ति।

**समाधानम्** : सीतया रामस्य कण्ठे अम्लानपङ्कजा माला प्रत्यक्षेपि। (प्रति + क्षिप् धातोः कर्मणि लुङ्) अत्र बुधाः वृथा परिभ्रमन्ति।

**पठनप्रवर्तनम्।**

❖ यावच्छक्यं प्रहेलिकाः सञ्चिनोतु। कक्ष्यायाम् अवतारयतु। ततः प्रहेलिकासम्पुटं रचयतु।

**श्रद्धेयाः अंशाः।**

- निर्दिष्टे समये सञ्चयनम्।
- क्रमीकरणम्।



# अनुबन्धः ।

## शब्दकोशः ।

| | | | |
|---|---|---|---|
| अङ्कः | कलङ्कः | കളങ്കം | stain |
| अतिथिः | अभ्यागतः | അതിഥി | guest |
| अदात् | अयच्छत् | നല്കി | gave |
| आस्यताम् | उपविशताम् | ഇരുന്നാലും | may sit |
| इन्दुः | चन्द्रः | ചന്ദ്രൻ | Moon |
| उद्वेजितः | पीडितः | പീഡിപ്പിച്ചത് | abused |
| किरणः | रश्मिः | രശ്മി | ray |
| केकरः | वक्रदृष्टिः | കോങ്കണ്ണൻ | squit eyed |
| केसरी | सिंहः | സിംഹം | lion |
| क्षुत् | बुभुक्षा | വിശപ്പ് | hunger |
| गुणसन्निपातः | गुणानां समूहः | ഗുണങ്ങളുടെ കൂട്ടം | paragon of virtues |
| गुणेतरः | दोषः | ദോഷം | blame |
| घनः | मेघः | മേഘം | cloud |
| घृतं | आज्यं | നെയ്യ് | ghee |
| छाया | अनातपा | നിഴൽ | shadow |
| तत्याज | अत्यजत् | ഉപേക്ഷിച്ചു | abandoned |
| तृड् | पिपासा | ദാഹം | thirst |
| तृणं | घासः | പുല്ല് | grass |
| दर्शनीयः | सुन्दरः | സുന്ദരൻ | beautiful |
| दायाद्यं | गोत्रधनं | പിതൃസ്വത്ത് | patrimony |
| द्विपः | गजः | ആന | elephant |
| निनाय | यापयामास | കഴിച്ചുകൂട്ടി | spent |
| निमज्जति | मज्जनं करोति | മുങ്ങുന്നു | sinks |
| पाशः | रज्जुः | കയർ | coir |
| पिङ्गलः | वानरः | കുരങ്ങ് | monkey |
| पुराविदः | पूर्ववृत्तं | പൂർവവൃത്താന്തം | former event |
| पृथिवी | भूमिः | ഭൂമി | earth |
| प्रभवः | उद्भवः | ഉദ്ഭവം | origin |
| भ्राताः | सोदरः | സഹോദരൻ | brother |
| मानदण्डः | मापकः | അളവുകോൽ | measuring rod |



| | | | |
|---|---|---|---|
| वगाह्य (अवगाह्य) प्रविश्य | | പ്രവേശിച്ചിട്ട് | having entered |
| वारिनिधिः | समुद्रः | സമുദ്രം | ocean |
| शठः | वञ्चकः | വഞ്ചകൻ | cheat |
| शैलः | पर्वतः | പർവതം | mountain |
| सानु | प्रस्थः | താഴ്‌വാരം | valley |
| सिद्धाः | देवयोनिविशेषाः | സിദ്ധന്മാർ | a category of Devas |
| हिमम् | तुषारः | മഞ്ഞ് | snow |

**अमरकोशः।**

| | |
|---|---|
| कीर्तिः | यशः कीर्ति समज्ञा च। |
| धरित्री | धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः। |
| सिंहः | सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरीहरिः। |
| शैलः | अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः। |
| हिमं | तुषारस्तुहिनं हिमम्। |
| आलयः | गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः। |
| इन्दुः | हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः। |

**शब्दरूपाणि।**

**अकारान्तः सर्वनाम सर्वशब्दः पुंसि।**

| | | | |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वे |
| सं. प्रथमा | हे सर्व | हे सर्वौ | हे सर्वे |
| द्वितीया | सर्वं | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्यां | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्यां | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात् | सर्वाभ्यां | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु। |



**स्त्रियाम्।**

| | | | |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| सं. प्रथमा | हे सर्वे | हे सर्वे | हे सर्वाः |
| द्वितीया | सर्वां | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्यां | सर्वाभिः |
| चतुर्थी | सर्वस्यै | सर्वाभ्यां | सर्वाभ्यः |
| पञ्चमी | सर्वस्याः | सर्वाभ्यां | सर्वाभ्यः |
| षष्ठी | सर्वस्याः | सर्वयोः | सर्वासाम् |
| सप्तमी | सर्वस्यां | सर्वयोः | सर्वासु । |

**क्लीबे**

| | | | |
|---|---|---|---|
| प्रथमा | सर्वं | सर्वे | सर्वाणि |
| सं. प्रथमा | हे सर्व | हे सर्वे | हे सर्वाणि |
| द्वितीया | सर्वं | सर्वे | सर्वाणि |

शेषं पुंवद्।

**ऋकारान्तः पुल्लिङ्गः नृ शब्दः।**

| | | | |
|---|---|---|---|
| प्रथमा | ना | नरौ | नरः |
| सं. प्रथमा | हे नः | हे नरौ | हे नरः |
| द्वितीया | नरं | नरौ | नॄन् |
| तृतीया | न्रा | नृभ्यां | नृभिः |
| चतुर्थी | न्रे | नृभ्यां | नृभ्यः |
| पञ्चमी | नुः | नृभ्यां | नृभ्यः |
| षष्ठी | नुः | न्रोः | नृणाम् |
| सप्तमी | नरि | न्रोः | नृषु। |

## धातुरूपाणि।

**आर - ऋगतौ लिट्. प. प. प्र. पु. ए. व.।**

| | | | |
|---|---|---|---|
| प्र.पु. | आर | आरतुः | आरुः |
| म.पु. | आरिथ | आरथुः | आर |
| उ.पु. | आर | आरिव | आरिम। |

**अक्षेपि - क्षिप् प्रेरणे कर्मणि लुङ्. आ. प. प्र. पु. ए. व.।**

| | | | |
|---|---|---|---|
| प्र.पु. | अक्षेपि | अक्षेपिषातां | अक्षेपिषत |
| म.पु. | अक्षेपिष्ठाः | अक्षेपिषाथां | अक्षेपिध्वं |
| उ. पु. | अक्षेपिषि | अक्षेपिष्वहि | अक्षेपिष्महि। |



## किमधिगतम् ?

### राज्ञः शूद्रस्य च मिथः भाषणलेखनम्

कथायाः आशयः स्वीकृतः
उचितसंबोधनरूपाणि प्रयुक्तानि
औचित्यं पालितम्।

| स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|
| | | |
| | | |
| | | |

### काव्यस्य टिप्पणीलेखनम्

सर्वेषां श्लोकानाम् आशयः स्वीकृतः
आशयानां क्रमीकरणम्
आमुखं शीर्षकम् इत्यादीनां योजनम्।

| | | |
|---|---|---|
| | | |
| | | |
| | | |

### श्लोकानाम् आलपनम्

उचितः तालः स्वीकृतः
आशयस्य अवबोधः
अक्षरस्फुटता।

| | | |
|---|---|---|
| | | |
| | | |
| | | |

### प्रहेलिकासम्पुटस्य रचना

द्वित्राः प्रहेलिकाः सञ्चिताः
कक्ष्यायामवतारिताः
सम्पुटे समायोजिताः
सम्पुटस्य नाम, सम्पादकीयञ्च लिखितम्।

| | | |
|---|---|---|
| | | |
| | | |
| | | |
| | | |